# શ્રીશાકમ્ભરીપઞ્ચકમ્

Shri Shakambhari Panchakam

sanskritdocuments.org

August 11, 2018

# Shri Shakambhari Panchakam

# શ્રીશાકમ્ભરીપઞ્ચકમ્

## Sanskrit Document Information

Text title : shAkambharIpanchakam

File name : shAkambharIpanchakam.itx

Category : devii, dashamahAvidyA, kavacha, shankarAchArya

Location : doc_devii

Author : Shankaracharya

Transliterated by : Prakash Ketkar

Proofread by : Prakash Ketkar, NA

Acknowledge-Permission: http://ioustotra.blogspot.com

Latest update : August 5, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 11, 2018

*sanskritdocuments.org*

Shri Shakambhari Panchakam

# શ્રીશાકમ્ભરીપઞ્ચકમ્

શ્રીવલ્લભસોદરી શ્રિતજનશ્ચિદ્દાયિની શ્રીમતી
શ્રીકણ્ઠાર્ધશરીરગા શ્રુતિલસન્માણિક્યતાટઙ્કકા ।
શ્રીચક્રાન્તરવાસિની શ્રુતિશિરઃ સિદ્ધાન્તમાર્ગપ્રિયા
શ્રીવાણી ગિરિજાત્મિકા ભગવતી શાકમ્ભરી પાતુ મામ્ ॥ ૧॥

શાન્તા શારદચન્દ્રસુન્દરમુખી શાલ્યન્નભોજ્યપ્રિયા
શાકૈઃ પાલિતવિષ્ટપા શતદૃશા શાકોલ્લસદ્વિગ્રહા ।
શ્યામાઙ્ગી શરણાગતાર્તિશમની શક્રાદિભિઃ શંસિતા
શઙ્કર્યષ્ટફલપ્રદા ભગવતી શાકમ્ભરી પાતુ મામ્ ॥ ૨॥

કઞ્જાક્ષી કલશી ભવાદિવિનુતા કાત્યાયની કામદા
કલ્યાણી કમલાલયા કરકૃતાં ભોજાસિખેટાભયા ।
કાદંવાસવમોદિની કુચલસત્કાશ્મીરજાલેપના
કસ્તૂરીતિલકાઞ્ચિતા ભગવતી શાકમ્ભરી પાતુ મામ્ ॥ ૩॥

ભક્તાનન્દવિધાયિની ભવભયપ્રધ્વંસિની ભૈરવી
ભર્માલઙ્કૃતિભાસુરા ભુવનભીકૃદ્ દુર્ગદર્પાપહા ।
ભૂભૃન્નાયકનન્દિની ભુવનસૂર્ભાસ્યત્પરઃ કોટિભા
ભૌમાનન્દ વિહારિણી ભગવતી શાકમ્ભરી પાતુ મામ્ ॥ ૪॥

રીતામ્નાયશિખાસુ રક્તદશના રાજીવપત્રેક્ષણા
રાકારાજકરાવદાતહસિતા રાકેન્દુબિમ્બસ્થિતા ।
રુદ્રાણી રજનીકરાર્ભકલસન્મૌલી રજોરુપિણી
રક્ષઃ શિક્ષણદીક્ષિતા ભગવતી શાકમ્ભરી પાતુ મામ્ ॥ ૫॥

શ્લોકાનામિહ પઞ્ચકં પઠતિ યઃ સ્તોત્રાત્મકં શર્મદં
સર્વાપત્તિવિનાશકં પ્રતિદિનં ભક્ત્યા ત્રિસન્ધ્યં નરઃ ।
આયુઃપૂર્ણમપારમર્થમમલાં કીર્તિં પ્રજામક્ષયાં
શાકમ્ભર્યનુકમ્પયા સ લભતે વિદ્યાં ચ વિશ્વાર્થકામ્ ॥ ૬॥

॥ ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં શાકમ્ભરીપઞ્ચકં સમ્પૂર્ણમ્ ॥

*Shri Shakambhari Panchakam*
pdf was typeset on August 11, 2018

Please send corrections to *sanskrit@cheerful.com*